## क्षुद्रजन्तवः । (८/९१२)

[1]अपचितपरिमाणः क्षुद्रः । क्षुद्रजन्तुवाचिनां[2] द्वन्द्वः एकवद् भवति । दंशमशकम् । यूकालिक्षम् । क्षुद्रजन्तवः इति किम् ? ब्राह्मणक्षत्रियौ ।

क्षुद्रजन्तुरनस्थिः स्याद[3]थ वा क्षुद्र एव यः ।
शतं वा [4]प्रसृतौ येषां केचिदा नकुलादपि ॥

[5]आ नकुलादपि इति [6]इयमेव स्मृतिः प्रमाणम्, इतरासां तद्विरोधात् ॥

## येषां च विरोधः शाश्वतिकः । (९/९१३)

विरोधो वैरम् । शाश्वतिको [7]नित्यः । येषां शाश्वतिको विरोधः तद्वाचिनां [8]शब्दानां द्वन्द्व एकवद् भवति । [9]मार्जारमूषकम्[10] । [11]अहिनकुलम् । शाश्वतिकः इति किम् ? [12]गोपालिशालङ्कायनाः कलहायन्ते । चकारः पुनरस्यैव समुच्चयार्थः । तेन पशुशकुनिद्वन्द्वे[13] विरोधिनाम[14]नेन नित्यमेकवद्भावो भवति – अश्वमहिषम् । [15]श्वशृगालम् । काकोलूकम् ॥

## शूद्राणामनिरवसितानाम् । (१०/९१४)

[16]निरवसानं बहिष्करणम् । [17]कुतो बहिष्करणम् ? [18]पात्रात् । यै[19]र्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः (म.भा.१.४७५) । न निरवसिताः अनिरवसिताः । अनिरवसितशूद्रवाचिनां [20]शब्दानां द्वन्द्व एकवद् भवति । तक्षायस्कारम् । रजक[21]तन्तुवायम् । अनिरवसितानाम् इति किम् ? चण्डालमृतपाः ॥

## गवाश्वप्रभृतीनि च । (११/९१५)

गवाश्वप्रभृतीनि [22]च कृतैकवद्भावानि [23]द्वन्द्वरूपाणि साधूनि भवन्ति ।

गवाश्वम् । गवाविकम् । [24]गवैडकम् । [25]अजाविकम् । अजैडकम् । [26]कुब्जवामनम् । [27]कुब्जकैरातकम् । पुत्रपौत्रम् । श्वचण्डालम् । स्त्रीकुमारम् । दासीमाणवकम् । [28]शाटीपिच्छकम् । उष्ट्रखरम् । उष्ट्रशशम् । मूत्रशकृत् । मूत्रपुरीषम् । [29]यकृन्मेदः । मांसशोणितम् । [30]दर्भशरम् । [31]दर्भपूतीकम् । अर्जुनशिरीषम् । तृणोलपम् । दासीदासम् । [32]कुटीकुटम् । भागवतीभागवतम्[33] ।

गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम्[34] । [35]रूपान्तरे तु नायं विधिर्भवति । गोऽश्वम्, [36]गोऽश्वौ । [37]पशुद्वन्द्वविभाषैव भवति ॥

---

1. अवचितपरिमाणः ह. 2. शब्दानाम् इत्यधिकम् ड. इ. ह. 3. कोऽपि फ. 4. प्रसृतिः इ. फ, प्रसृते इ. 5. आ नास्ति ह. 6. इयमेव प्रमाणम् फ. ह. 6. इयमेव प्रमाणम् फ. ह. 7. नित्यम् इ. 8. शब्दानां नास्ति इ. 9. मार्जारमूषिकम् ड. फ. ग. 10. श्ववाराहम् इत्यधिकम् इ. फ, श्ववराहम्, श्रमणब्राह्मणम् इत्यधिकम् क. 11. अहिनकुलम् नास्ति ह. 12. गोपालिक° फ. ह, गोपालि° ड. 13. विभाषां बाधित्वा इत्यधिकम् क. 14. अनेनैव नित्य एव ह. 15. श्वशृगालम् नास्ति ब.क.ड.इ. 16. निरवसितम् अ. 17. वाक्यमिदं नास्ति ड. इ. 18. पात्राणाम् इ. 19. भुक्तं फ, भुक्तैः ब, भुक्ते पात्राणि न शुध्यन्ते इ. 20. शब्दानाम् नास्ति क. ह. 21. °तुन्नवायम् ग. 22. शब्दरूपाणि द्वन्द्वे साधूनि क. इ. फ. ड. 23. द्वन्द्वरूपाणि नास्ति ह. 24. गवैलकम् क. 25. नास्ति ह. 26. कुब्जवमनम् ड 27. कुब्जकिरातम् ड. फ, कुष्वकैरातम् क. ह. 28. शाटीप्रच्छदम् ब. क, शाटीपटरिम् फ, शाटीपटीकम् ड, शाटीपटम् ह. 29. यकृन्मेदम् ह. 30. दर्भशवम् ड. 31. दर्भपुरीतकम् ह. 32. कुक्कुटीकुक्कुटम् ह. 33. इति गवादिः इत्यधिकम् ड. 34. साधु इ. ह. साधु भवति फ. 35. रूपान्तरेषु इ. ह. 36. गोऽश्वौ नास्ति फ. 37. °विभाषयैकवद् भवति ह, °विभाषयैव इ.